# प्रथमपत्रम्

## व्याकरणम्

समय: घण्टात्रयम् पूर्णाङ्काः 100

### प्रथमभाग:

### (लघुसिद्धान्तकौमुदी)

अ. सर्वे प्रश्नाः समाधेयाः। (20×2=40)

1. "लघुसिद्धान्तकौमुदी" इति ग्रन्थस्य लेखकः कः?

2. पञ्चमं माहेश्वरसूत्रं किम्?

3. उदात्तसंज्ञा केन सूत्रेण भवति?

4. अकारस्य कति भेदाः सन्ति?

**अथवा**

शकारस्य उच्चारणस्थानं किम्?

5. यत्नः कतिविधः भवति?

6. "परः सन्निकर्षः संहिता" इति सूत्रस्य कोऽर्थः?

7. "तस्मिन्निति निर्दिष्टे पूर्वस्य" इति सूत्रस्य कोऽर्थः?

**अथवा**

"एचोऽयवायावः" सूत्रेण ओकारस्य स्थाने कः आदेशः भवति?

8. महोत्सवः इत्यत्र कः सन्धिः?

9. "अक्षादूहिन्यामुपसंख्यानम्" इत्यस्य कोऽर्थः?

10. प्राच्छेति इत्यत्र वृद्धिः केन सूत्रेण भवति ?

11. "अकः सवर्णे दीर्घः" इति सूत्रार्थः कः ?

अथवा

"अनेकाल्शित् सर्वस्य" इति सूत्रेण किं भवति ?

12. हरी एतौ इत्यत्र कः सन्धिः ?

13. "अचो रहाभ्यां द्वे" इत्यस्य उदाहरणं किम् ?

अथवा

"स्तोः श्चुना श्चुः" इति सूत्रस्य कोऽर्थः ?

14. "अनाम्नवतिनगरीणामिति वाच्यम्" इत्यस्य कोऽर्थः ?

15. "तोर्लि" इति सूत्रस्य कोऽर्थः ?

16. "शश्छोऽटि" इति सूत्रस्य कोऽर्थः ?

17. टित्कितौ कुत्र भवतः ?

18. "संपुम्कानां सो वक्तव्यः" इति वार्तिकेन किं भवति ?

19. "विसर्जनीयस्य सः" इति सूत्रेण किं भवति ?

अथवा

अहर्गणः इत्यत्र सन्धिविच्छेदं कुरुत।

20. तुल्यबलविरोधे किं कार्यं भवति ?

ब. **सर्वे प्रश्नाः समाधेयाः।** (6×5=30)

21. वर्णानाम् उच्चारणस्थानं लिखत।

अथवा

सुध्युपास्यः, हरये, गव्यम् एषु द्वयोः ससूत्रं सिद्धिर्विधेया।

22. उपेन्द्रः, तवल्कारः, कृष्णैकत्वम् एषु द्वयोः ससूत्रं सिद्धिर्विधेया।

**अथवा**

प्रेजते, दैत्यारिः, गवेन्द्रः एषु द्वयोः ससूत्रं सिद्धिर्विधेया।

23. इ इन्द्रः, ब्रह्मर्षिः अनयोः प्रयोगयोः सिद्धिः कार्या।

24. रामष्षष्ठः वागीशः अनयोः प्रयोगयोः सिद्धिः कार्या।

25. प्राङ्ख् षष्ठः, प्राङ्क्षष्ठः, प्राङ्षष्ठः इति प्रयोगं साधयत।

**अथवा**

चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व, काँस्कान्, कांस्कान् इति प्रयोगं साधयत।

26. विष्णुस्त्राता, अहरहः, शम्भू राजते एषु प्रयोगद्वयं साधयत।

## द्वितीयभागः

## अमरकोशः

**स. द्वयोः उत्तरं लिखत। (2×5=10)**

27. श्वसनः स्पर्शनो. . . .इत्यारभ्य पञ्चश्लोकाः लेखनीयाः।

28. शिवस्य; विष्णोः अमरकोशानुसारं पञ्च पञ्च पर्यायशब्दाः लेखनीयाः।

**अथवा**

बुद्धस्य, इन्द्रस्य च पञ्च पञ्च पर्यायशब्दाः लेखनीयाः।

(अनुवादशिक्षणम्)

द. यथेच्छं पञ्चवाक्यानां हिन्दीभाषया अनुवादः कार्यः।

(5×2=10)

29. वृक्षात् फलानि पतन्ति।

30. बालकाः विद्यालयं गच्छन्ति।

31. रामः बाणेन रावणं हतवान्।

32. बालकाय मोदकं रोचते।

33. राधाकृष्णाभ्यां नमः।

34. विद्यालयं परितः वृक्षाः सन्ति।

35. सः आसन्दे उपविशति।

36. यतो धर्मस्ततो जयः।

य. यथेच्छं पञ्चवाक्यानां संस्कृतभाषया अनुवादः कार्यः।

(5×2=10)

37. तालाब के दोनों ओर बच्चे हैं।

38. यह भारतवर्ष है।

39. हमेशा सत्य बोलना चाहिए।

40. विद्यालय में छात्र पढ़ते हैं।

41. तुम सब विद्यालय कब जाते हो।

42. ज्ञान से ही मुक्ति मिलती है।

43. अच्छे कार्य करना चाहिए।

44. सज्जन लोग परोपकार करते हैं।